# अभ्यास—प्रश्नपत्रम् 2014

## संस्कृतम्

अवधि : होरात्रयम् **Class - X** पूर्णाङ्कः – नवतिः

**समयः : होरात्रयम्** **पूर्णाङ्काः : 90**

**सामान्य निर्देशः** विद्यार्थी कृपया निर्देश अभ्यास प्रश्नपत्रम्-1 (हलसहितम्) से देखें।

### खण्डः 'क' 10 अङ्काः

### अपठितांश-अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत—**

प्रकृत्या अस्मभ्यम् शुद्धम् पवित्रं च पर्यावरणम् प्रदत्तम्। परं मानवैः स्वकुकृत्यैः इदं प्रदूषितम् कृतम्। प्रदूषणसमस्यायाः विषये अद्य सम्पूर्णः विश्वः चिन्ताकुलः अस्ति। प्रदूषण निवारणस्य उपायेषु 'वृक्षारोपणम्' सर्वोत्कृष्टं मतम्। प्रदूषणसमस्या तदैव उपस्थिता यदा मानवेन स्वार्थसिद्धये वृक्षकर्तनम् आरब्धम्। वृक्षाः मानवजीवनस्य प्राणभूताः। तेषामभावे च विषाक्तवायुः, अतिवृष्टिः, अनावृष्टिः भूक्षरणम् च भवति। प्रकृतौ सन्तुलनस्थापनार्थं वृक्षरक्षणम् वृक्षारोपणम् च आवश्यकम्। विषाक्तवायोः शोषणस्य सामर्थ्यम् वृक्षेषु एवास्ति। येन वातावरणं शुद्धं भवति। नष्टप्रायाणां पशुपक्षिणाम् जातीनाम् च रक्षा अपि अनेनैव संभवा। अतः वृक्षारोपणम् अधिकाधिकं कर्तव्यम्। यतो हि 'वृक्षो रक्षति रक्षितः'। 10

**I. एकपदेन उत्तरत—** ½ × 4 = 2

(*i*) रक्षितः कः रक्षति?

(*ii*) प्रकृत्या कीदृशं पर्यावरणं प्रदत्तम्?

(*iii*) वृक्षाः कस्य प्राणभूताः?

(*iv*) वृक्षारोपणम् किमर्थम् आवश्यकम्?

**II. पूर्णवाक्येन उत्तरत—** 2 × 2 = 4

(*i*) प्रदूषणसमस्या कदा उपस्थिता अभवत्?

(*ii*) वृक्षाणाम् अभावे किम् भविष्यति?

**III. भाषिककार्यम्—** 1 × 4 = 4

(*i*) 'इदं प्रदूषितम् कृतम्।' अत्र 'इदम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) प्रकृत्यै (ख) अस्मभ्यम् (ग) मानवाय (घ) पर्यावरणाय

(*ii*) 'सम्पूर्णः' इति विशेषणपदस्य किं विशेष्यपदम्?

(क) विश्वः (ख) पर्यावरणम् (ग) चिन्ताकुलः (घ) वृक्षारोपणम्

(*iii*) 'सुकृत्यैः' इति पदस्य विपरीतार्थकं पदं चित्वा लिखत।

(क) सर्वोत्कृष्टं (ख) कुकृत्यैः (ग) सामर्थ्यम् (घ) कर्तव्यम्

(*iv*) 'यतो हि वृक्षो रक्षति रक्षितः।' इति अस्मिन् वाक्ये ''रक्षति'' इति क्रियापदस्य किं कर्तृपदम्?

(क) रक्षितः (ख) वृक्षः (ग) पर्यावरणम् (घ) यतः

### खण्डः 'ख' 15 अङ्काः

### रचनात्मकं-लेखनम्

**पत्रलेखनम्**

**2. भवान् वरुणः। विषयचयन-सम्बन्धि परामर्शं यच्छन् मित्रं तरुणम् प्रति लिखिते अस्मिन् पत्रे मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत।** ½ × 10 = 5

(*i*) ...................................

दिनाङ्कः 10.06.2012

प्रिय मित्र तरुण,

(*ii*) ...................................

अद्य तव दशम कक्षायाः परीक्षा परिणामं (*iii*) ................................... अतीव प्रसन्ना अस्मि। प्रभोः कृपया त्वया सर्वेषु विषयेषु नवतिः प्रतिशतादधिकाः अङ्काः प्राप्ताः। स्वरुच्यनुसारेण विषयस्य चयने न किमपि। (*iv*) ................................... भविष्यति। ये विषयाः अस्मभ्यं (*v*) ................................... ते एव चयनीयाः। अहं चिकित्सकः भवितुमिच्छामि तत्र गणित विषयस्य न का अपि आवश्यकता। अतः मया भौतिकशास्त्रं, रसायनशास्त्रं (*vi*) ................................... च स्वीकृतम् परं आयुर्वेदस्य पठने संस्कृतस्य ज्ञानं (*vii*) ................................... भविष्यति इति विचार्य गणितस्य स्थाने संस्कृतम् अङ्गीकृतम्। त्वया अपि स्वरुचि-अनुसारम् एव लक्ष्यनिर्धारणं कर्त्तव्यम् तदनुरूपं च विषयानां चयनम्। किमपि (*viii*) ................................... अविचार्य च न कर्त्तव्यम्। तव लक्ष्यं किम् इति पत्रद्वारा सूचयतु भवान्।

स्वमातृपितृ चरणेषु मम (*ix*) ................................... निवेदनीयाः।

तव (*x*) ................................... मित्रम्

वरुणः

**मञ्जूषा**– काठिन्यम्, नमोनमः, अभिन्नहृदयम्, जीवविज्ञानम्, सहसा, मुम्बईतः, ज्ञात्वा, रोचन्ते, प्रणामाः, सहायकं।

## अनुच्छेदलेखनम्

**3. 'वृक्षाणाम् महत्त्वम्.........' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत।**


$2 \times 5 = 10$

**मञ्जूषा**– जीवनाय आवश्यकम्, पुष्पाणि फलानि, ईन्धनं, कर्गदपत्रम् यच्छन्ति, खगानां आश्रयः, भवननिर्माणाय काष्ठम्, 'आक्सीजन' इति वायुः यच्छन्ति, पर्यावरणं शोधयन्ति।

**अथवा**

## चित्रवर्णनम्

**मञ्जूषायां प्रदत्त शब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत।** $2 \times 5 = 10$



**मञ्जूषा**– रेलस्थानकम्, रेलयानम्, यात्रिणः, आरोहन्ति, रेलयाने, उपविष्टाः, बालकः, विक्रेता, समाचारपत्राणां, लौहपथे आवागमनम्।

## खण्डः 'ग' 30 अङ्काः

## अनुप्रयुक्त-व्याकरणम्

**4. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत—** 1 × 5 = 5

(*i*) भाष्यम् एतच्छंकरेण रचितम्।

(क) एतच् + छंकरेण (ख) एतत् + छंकरेण (ग) एतत् + शंकरेण (घ) एतच् + शंकरेण

(*ii*) नानृतम् ब्रूयात्।

(क) न + अनृतम् (ख) नाना + ऋतम् (ग) नानृ + तम् (घ) ना + अनृतम्

(*iii*) न चञ्चलं मनः + अनुभ्रामयेत्।

(क) मनरनुभ्रामयेत् (ख) मनोअनुभ्रामयेत् (ग) मनोऽनुभ्रामयेत् (घ) मनस्नुभ्रामयेत्

(*iv*) नेन्द्रियवशगः स्यात्।

(क) ने + इन्द्रियवशगः (ख) नेन्द्रिय + वशगः (ग) न + इन्द्रियवशगः (घ) नेन्द्रि + यवशगः

(*v*) कदापि अहङ्कारः न कर्तव्यः।

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत—** 1 × 6 = 6

(*i*) राष्ट्रपतिभवनस्य मुगल-गार्डन इति उद्यानम् अतीव-सुन्दरम्। ..............................

(क) राष्ट्रपतेः भवनस्य (ख) राष्ट्रपत्युः भवनस्य (ग) राष्ट्रपतस्य भवनस्य (घ) राष्ट्रस्य पतिभवनस्य

(*ii*) अस्मिन् वने पञ्चानां वटानां समाहारः अस्ति यत्र श्रीरामः अवसत्। ..............................

(क) पञ्चवटाः (ख) पञ्वट्याम् (ग) पञ्चवटी (घ) पञ्चवटम्

(*iii*) अस्मिन् सरसि रक्तं च तत् उत्पलं विकसति। ..............................

(क) रक्तोतोत्पलम् (ख) रक्तोत्पलम् (ग) रक्तानिउत्पलानि (घ) रक्तमुत्पलम्

(*iv*) सूपकारः ध्यानेन कार्यं कुर्युः। ..............................

(क) सूपस्य काराः (ख) सूपस्य कर्तारः (ग) सूपं करोति ये ते (घ) ये सूपम् कुर्वन्ति

(*v*) तस्य चन्दनशीतलं वचः औषधस्य कार्यं करोति। ..............................

(*vi*) शक्रः आशान्वितः तत्रागच्छत्। ..............................

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत—** 1 × 5 = 5

(*i*) सर्वथा जागरूकाः एव विवेक + इनि भवन्ति। ..............................

(क) विवेकिन् (ख) विवेकी (ग) विकेकीणि (घ) विवेकिनः

(*ii*) सभायां बुद्धि + मतुप् जनाः उपस्थिताः आसन्। ..............................

(क) बुद्धिमानाः (ख) बुद्धिमन्तः (ग) बुद्धिमत्ताः (घ) बुद्धिवन्त

(*iii*) मम वर्ष + ठक् परीक्षा श्वः भविष्यति। ..............................

(क) वार्षिठ्की (ख) वार्षिकी (ग) वृआर्षिक्याई (घ) वार्षिक

(*iv*) प्रतिदिनं समाचारपत्रं पठनीयम्। ..............................

(क) पद् + अनीयम् (ख) पद् + अनीयर् (ग) पठ + नीयम् (घ) पठन + अनीयर्

(*v*) विद्यालये यथाकालमेव गम् + तव्यत्। ..............................

**7. प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत।** 1 × 5 = 5

(*i*) ........................ अस्मिन ग्रामे एकः साधु वसति स्म।

(क) इव (ख) पुरा (ग) बहिः (घ) नूनम्

(*ii*) पशवः ........................ भ्रमन्ति।

(क) उच्चैः (ख) इतस्ततः (ग) यथा (घ) विना

(*iii*) यथा राजा ........................ प्रजा।

(क) तथा (ख) एव (ग) इदानीम् (घ) अपि

(*iv*) ........................ प्रातः कालः।

(क) तत्र (ख) अधुना (ग) विना (घ) शनैः

(*v*) रात्रौ गृहात् बहिः ........................मा विहर।

(क) वृथा (ख) अधुना (ग) शनैः (घ) यथा

**8. वाच्यानुसारम् प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा रिक्तस्थानानि पूरयत।** 1 × 5 = 5

**राधा** — किं अभिकारी (*i*) ................................सूचयति?

(क) सेवकाः (ख) सेवकैः (ग) सेवकान् (घ) सेवकम्

**माधवः** — आम् (*ii*) ................................ सेवकाः सूच्यन्ते।

(क) अधिकारी (ख) अधिकारिणा (ग) अधिकारिनम् (घ) अधिकारिणम्

**राधा** — किं सैनिकाः देशं (*iii*) ................................ ?

(क) रक्षन्ति (ख) रक्षति (ग) रक्ष्यते (घ) रक्ष्यन्ते

**माधवः** — आम् (*iv*) ................................ देशः रक्ष्यते।

(क) सैनिकाः (ख) ते (ग) तैः (घ) तेन

**राधा** – न केवलं सैनिकैः अपितु (*v*) ..................... अपि देशः रक्ष्यते।

(क) वयम् (ख) अस्मान् (ग) अस्माभिः (घ) अस्माकम्

**9. अधः नाटक-प्रतियोगितायाः कार्यक्रमः लिखितः। अङ्काणां स्थाने संस्कृत पदैः समयं लिखत।** 1 × 4 = 4

(*i*) प्रातः 9.45 प्रातः ........................................ वादने दीपप्रज्वालनम्।

(*ii*) प्रातः 10.15 प्रातः ........................................ वादने अतिथेः स्वागतम्।

(*iii*) प्रातः 10.30 प्रातः ........................................ वादने नाटकाभिनयः।

(*iv*) मध्याह्ने 3.00 मध्याह्ने ........................................ वादने कार्यक्रमसमाप्तिः।

## खण्डः 'घ' 35 अङ्काः

## पठितांश-अवबोधनम्

**10. अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रश्नानामुत्तराणि लिखत—** 15

**(क) गद्यांशः**

अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् 'मम

अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते' एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्। 5

**I. एकपदेन उत्तरत—** ½ × 2 = 1

(*i*) अर्थिनः केन सन्तुष्टाः ?

(*ii*) सकलं ब्रह्माण्डं कीदृशं जातम् ?

**II. पूर्णवाक्येन उत्तरत—** 1 × 2 = 2

(*i*) कीदृशाः दानवीराः सौभाग्यशालिनः ?

(*ii*) किं ज्ञात्वा सकलं ब्रह्माण्डं व्याकुलं जातम्?

**III. भाषिककार्यम्—** 1 × 2 = 2

(*i*) 'याचकाः' अस्य कः पर्यायः ?

(क) राजा (ख) अर्थिनः (ग) दानवीराः (घ) याचन्ते

(*ii*) 'अर्थिनाम्' अस्य किं विशेषणपदम् गद्यांशे प्रयुक्तम् ?

(क) विरलसंख्याम् (ख) असन्तुष्टानाम् (ग) सौभाग्यशालिनः (घ) व्याकुलाः

**(ख) पद्यांशः** 5

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।
प्रह्लादयति च पुरुषं, यथा मधुरभाषिणी वाणी॥

**I. एकपदेन उत्तरत—** ½ × 2 = 1

(*i*) कीदृशी वाणी पुरुषं प्रह्लादयति ?

(*ii*) कीदृशी छाया पुरुषं न प्रह्लादयति ?

**II. पूर्णवाक्येन उत्तरत—** 2 × 1 = 2

पुरुषं किं तथा न प्रसन्नं करोति यथा मधुरभाषिणी वाणी ?

**III. भाषिककार्यम्—** 1 × 2 = 2

(*i*) 'जलम्' अस्मिन् अर्थे किं पदम् अत्र प्रयुक्तम् ? ..............................

(क) शीतलम् (ख) रसः (ग) सलिलम् (घ) चन्दनः

(*ii*) 'शीतला' इति पदं कस्याः विशेषणपदम् ? ..............................

(क) चन्दनः (ख) जलम् (ग) छाया (घ) वाणी

**(ग) नाट्यांशः**

(अश्वशालायां केचिद् अश्वाः दग्धाः केचिद् अर्धदग्धाः केचन् च पञ्चत्वं गताः)

**राजा** — (दग्धां हयशालां विलोक्य) हा! दग्धाः मे घोटकाः कथं रक्षणीयाः ? सपदि उपायः क्रियताम्।

**राजवैद्यः** — कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा॥ 5

**I. एकपदेन उत्तरत—** ½ × 2 = 1

(*i*) अश्वानां वह्निदोषः केषां मेदसा शाम्यति ?

(*ii*) सूर्योदये किम् नश्यति ?

**II. पूर्णवाक्येन उत्तरत—** 2 × 1 = 2

दग्धां हयशालां दृष्ट्वा राजा किम् उवाच ?

**III. भाषिककार्यम्—** $1 \times 2 = 2$

(*i*) 'शीघ्रम्' अस्मिन् अर्थे किं पर्यायपदम् अत्र प्रयुक्तम्? ..............................................

(क) उपाय: (ख) केचिद् (ग) सपदि (घ) मेदसा

(*ii*) श्लोके प्रयुक्तम् 'अभ्येति' क्रियापदस्य किं कर्तृपदम्? ..............................................

(क) कपय: (ख) दोष: (ग) अश्व: (घ) तम:

**11. अधोलिखितश्लोकयो: भावार्थं मञ्जूषात: उचितपदानि चित्वा पूरयत—** 4

**(*i*) रसनास्वादलुब्धा: यूयम् अस्य कुपरिणामं न जानीथ।** $1 \times 2 = 2$

**भावार्थ:—** यूयम् सर्वे वानरा: (*i*) .................................. स्वादस्य लोलुपा:; अत: अस्य क्षणिकसुखस्य (*ii*) .................................. न जानीथ यत् अनेन युष्माकं विनाश: भविष्यति।

**(*ii*) तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ!**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥** $1 \times 2 = 2$

**भावार्थ:—** हे भरतर्षभ! त्वम् सर्वप्रथमम् (*i*) .................................. एव वशे कृत्वा एवं पापिनं मारय य: मनुष्यस्य समस्तं ज्ञानम् (*ii*) .................................. च नाशयति।

**12. निम्नलिखितश्लोकस्य अन्वयं पूरयित्वा लिखत—** $1 \times 4 = 4$

**ध्यायत: विषयान् पुंस: सङ्गस्तेषूपजायते।**
**सङ्गात् सञ्जायते काम: कामात्क्रोधोऽभिजायते॥**

**अन्वय:—** विषयान् (*i*) .................................. पुंस: तेषु सङ्ग: (*ii*) ..................................। सङ्गात् (*iii*) .................................. संजायते। (*iv*) .................................. क्रोध: अभिजायते।

**13. वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत—** $1 \times 4 = 4$

(*i*) पठने <u>अक्षराणाम्</u> स्पष्टता स्यात्।

(*ii*) <u>न्याययुक्तमार्गे</u> एव स्थातव्यम्।

(*iii*) <u>गुरुवचनम्</u> सदा उपादेयम् भवति।

(*iv*) <u>विवेकी</u> जागर्ति।

**14. अधोलिखितवाक्यानि घटनाक्रमानुसारम् पुन: क्रमेण लिखत—** $\frac{1}{2} \times 8 = 4$

(*i*) राजगृहे जिह्वालोलुप: एक: मेष: महानसं प्रविश्य यत् किमपि खादति स्म।

(*ii*) तत्रस्थान् दग्धान् अश्वान् दृष्ट्वा राजा वैद्या: आहूता:।

(*iii*) मेषताडनं दृष्ट्वा वानरयूथप: कपीन् राजभवनं त्यक्तुम् अकथयत्।

(*iv*) वानरमेद: एव औषधम् इति श्रुत्वा मृत्युभयात् कपय: पश्चातापम् अकुर्वन्।

(*v*) एकस्मिन् प्रासादे चन्द्रनाम्न: भूपते: पुत्रा: वानरै: सह क्रीडन्ति स्म।

(*vi*) यदा वानराः स्वर्गतुल्यान् भोज्यपदार्थान् त्यक्तुं न ऐच्छन् तदा वानरयूथपः एकाकी वनमगच्छत्।

(*vii*) सूपकाराः तं येन केन पदार्थेन ताडयन्ति स्म।

(*viii*) एकदा ज्वलितकाष्ठेन ताडितः ज्वलन् मेषः अश्वशालां प्रविशत्।

**15. प्रसङ्गानुसारं रेखाङ्कितपदानां शुद्धम् अर्थं चित्वा लिखत।** $1 \times 4 = 4$

(*i*) अस्य <u>याच्ञा</u> वृथा मा अस्तु।

(क) याचना (ख) भिक्षा (ग) यातना

(*ii*) तस्य प्रथमम् एकं चक्षुः <u>प्रतिष्ठितम्</u> अभवत्।

(क) आदरयोग्यम् (ख) प्रस्थानयोग्यम् (ग) स्थापितम्

(*iii*) शक्रः तत्रैव <u>अन्तर्हितः</u> अभवत्।

(क) अग्रे स्थितः (ख) विलुप्तः (ग) मध्ये स्थितः

(*iv*) किम् <u>जीवितम्</u>?

(क) विद्यामयम् (ख) अविद्यमानम् (ग) निष्कलङ्कम्

❑❑